Roll No. ...............................

# D–3359

## B. A. (Classics) (Part III) EXAMINATION, 2020

SAHITYAM

**(Optional)**

Paper Second

*Time : Three Hours* ] [ *Maximum Marks : 75*

सूचना : सर्वे प्रश्नाः समाधेयाः ।

1. कस्याप्येकस्य पद्यस्य व्याख्या कार्या— 10

(i) जयन्ति बाणासुर मौलिलालिता दशास्य चूडामणि-
चक्रचुम्बिनः ।
सुरासुराधीशशिखान्तशायिनो भवच्छिदस्त्र्यम्बक-पाद-
पांसवः ॥

(ii) सुभाषिते हारि विशत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतम् ।
तदेव धत्ते हृदयेन सज्जनो हरिर्महारत्नमिवातिनिर्मलम् ॥

(iii) हरन्ति कंनोज्ज्वलदीपकोमैर्नपैः पदार्थैरुपपादिताः कथाः ।
निरन्तरश्लेषघनाः सुजातयो महास्रजश्चम्पक-कुड्मलैरिव ॥

P. T. O.

2. कयोश्चिद् द्वयोः गद्यांशयोः व्याख्यां कुरुत— 20

(i) आसीदशेष-नरपति-शिरः समभ्यर्च्चितशासनः पाक-शासन इवापरः, चतुरुदधि-माला-मेखलाया भुवो भर्त्ता, प्रतापानुरागावनत-समस्तसामन्तचक्रः, चक्रवर्तिलक्षणोपेतः, चक्रधर इव शरकमलोपलक्ष्यमाणशङ्खचक्र-लाञ्छनः, हर इव जितमन्मथः, गुह इवाप्रतिहतशक्तिः, कमलयोनिरिव विमानीकृतराजहंसमण्डलः, जलधिरिव लक्ष्मीप्रसूतिः गङ्गाप्रवाह इव भगीरथपथप्रवृत्तः, रविरिव प्रतिदिवसोपजायमानः, मेरुरिवसकलोपजीव्यमान-पादपच्छायः, दिग्गज इवा नवरत प्रवृत्तदानार्द्रीकृतकरः, कर्त्ता महाश्चर्याणाम्, आहर्त्ता क्रतूनाम्, आदर्शः सर्व शास्त्राणाम्, उत्पत्तिः फलानां, कुलभवन गुणानाम्, आगमः काव्यामृतरसानाम्।

(ii) तस्य च राज्ञः कलिकालभयपुञ्जीभूत-कृतयुगानुकारिणी त्रिभुवनप्रसवभूमिरिव विस्तीर्णा मज्जन्मालवविलासिनी-कुचतटास्फालन-जर्जरितोर्मिमालया जलाबगाहनयात-जयकुञ्जर-कुम्भ-सिन्दूर-सन्ध्या-यमानसलिलयोन्मदकहंसकु लकोलाहलमुखरित-कूलया वेत्रवत्या परिगता विदिशाभिधाना नगरी राजधान्यासीत्।

(iii) उपचरित-पशुपतिपूजश्च निष्क्रम्य देवगृहान्नि-र्वत्तिताग्निकार्यो विलेपनभूमौ झङ्कारिभिरलि-कदम्बकैरनुबध्यमानपरिमलेन मृगमदकर्पूरकुङ्कुमवास-

सुरभिणा चन्दनेनानुलिप्तसर्वाङ्गो विरचिता-मोदिमालतीकुसुमशेखरः कृतवस्त्रपरिवर्तः रत्नकर्णपूरमात्राभरणः समुचितभोजनैः सहभूपतिभिराहारम-भिमतरसास्वाद-जातिप्रीतिरवनिपोनिर्क्तयामास।

(iv) एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्त्तमानस्य कथमपि पितुरहमेवैको विधिवशात् सूनूरभवम्। अतिप्रबलया चाभिभूता ममैव जायमानस्य प्रसववेदनया जननी मे लोकान्तरमगमत्। अभिमतजायाविनाशदुःखितोऽपि खलु तातः सुतस्नेहादन्त र्निगृह्य पटुप्रसरसपि शोकमेकाकी मत्संवर्धनपर एवाभवत्।

3. महाकविबाणभट्टस्य कथामुखभागस्य कादम्बर्यानुसारं व्याख्या कार्या। 10

अथवा

'बाणोच्छिष्टं जगत् सर्वं' इति विवेचयत।

4. अधोलिखितेषु पद्यद्वयस्य व्याख्या विधेया— 20

(i) निपीय यस्य क्षितिरक्षिणः कथां
तथाद्रियन्ते न बुधास्सुधामपि।
नलस्सितच्छत्त्रितकीर्तिमण्डलस्य
राशिरासीन्महसां महोज्वलः॥

(ii) अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः।

वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः॥

(iii) नलस्यपृष्टा निषधागता गुणान्
मिषेण दूतद्विजवन्दिचारणाः।
निपीय तत्कीर्तिकभामभानया
चिराय तस्थे विमनायमानया॥

(iv) अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि।
श्रुतिगामितया दमस्वसुर्व्यतिभाते सुतरां धरापते॥

5. 'नैषधं विद्वद् औषधम्' इति विवेचयत। 15

अथवा

नैषधीयचरितस्य प्रथमसर्गस्य कथासारः लेख्यः।